पूर्णकः-र्णिका, पुपूर्णयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचूर्णयतिवत् (550) ज्ञेयानि ।

(1040) "पूर्व निकेतने" (X-चुरादिः-1666. अक. सेट्. उभ.)

'गुर्द पूर्वनिकेतने' इति चुरादिषु पठितस्य धातोः केषाञ्चित् मतेन 'गुर्द–पूर्व' इति व्यस्तपाठपक्षे धातुरयमुपात्तः । 'पूर्व पूर्वनिकेतने' इति धा. का. (3-31) पाठः ।

'पूरणे पूर्वतीति स्यात् पूर्वयेत् णौ निकेतने ॥' (श्लो. 162) इति देवः ।

पूर्वकः-र्विका, पुपूर्वयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचूर्णयतिवत् (550) ज्ञेयानि ।

(1041) "पूल सङ्घाते" (I-भ्वादिः-528. अक. सेट्. पर.)

'संघाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥' (श्लो. 156) इति देवः ।

पूलकः-लिका, पूलकः-लिका, पुपूलिषकः-षिका, पोपूलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककूलतिवत् (244) ज्ञेयानि । [1]पूलः ।

(1042) "पूल सङ्घाते" (X-चुरादिः-1637. अक. सेट्. उभ.)

'संघाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥' (श्लो. 156) इति देवः ।

पूलकः-पुपूलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककूटयतिवत् (240) ज्ञेयानि ।

(1043) "पूष वृद्धौ" (I-भ्वादिः-675. अक. सेट्. पर.)

पोषकः-षिका, पोषकः-षिका, पुपूषिषकः-षिका, पोपूषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचूषतिवत् (552) ज्ञेयानि । [2]पूषा ।

(1044) "पॄ पालनपूरणयोः"

(III-जुहोत्यादिः-1086. सक. अनि. पर.) [अ]

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । पूलः = मूलिकाविशेषः ।
2. बाहुलकात् औणादिके [द. उ. 6.55.] कनिन्प्रत्यये रूपम् । पूषा = आदित्यः ।

[अ] "ह्रस्वान्तोऽयं धातुरिति-वर्धमान-काश्यप-आभरण-पुरुषकाराः । [क्षीर] स्वामी तु दीर्घान्तं पठित्वा, 'ह्रस्वान्तोऽयम्' इति नन्दी ।' इति । आत्रेय-मैत्रेयौ तु ह्रस्वान्तं पठित्वा, 'दीर्घान्तमेके' इति । ....... वृत्तिकारस्य